योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः २४

चतुर्विंशः सर्गः २४

बलिरुवाच ।

केनोपायेन बलवान्स तात परिजीयते ।

कोऽसावतिमहावीर्यः सर्वं प्रकथयाशु मे ।। १

विरोचन उवाच ।

मन्त्रिणस्तस्य तनय नित्याजेयस्थितेरपि ।

श्रृणु वच्मि सुसाधत्वं येनासौ परिजीयते ।। २

पुत्र युक्त्या गृहीतोऽसौ क्षणादायाति वश्यताम् ।

युक्तिं विना दहत्येष आशीविष इवोद्धतः ।। ३

बालवल्लालयित्वैनं युक्त्या नियमयन्ति ये ।

राजानं तं समालोक्य पदमासादयन्ति ते ।। ४

दृष्टे तस्मिन्महीपाले स मन्त्री वशमेति च ।

तस्मिंश्च मन्त्रिण्याक्रान्ते स राजा दृश्यते पुनः ।। ५

यावन्न दृष्टो राजासौ तावन्मन्त्री न जीयते ।

मन्त्री च यावन्न जितस्तावद्राजा न दृश्यते ।। ६

राजन्यदृष्टे दुर्मन्त्री स दुःखाय फलत्यति ।

मन्त्रिण्यनिर्जिते राजा सोऽत्यन्तं यात्यदृश्यताम् ।।७

अभ्यासेनोभयं तस्मात्सममेव समारभेत् ।

राजसंदर्शनं तस्य मन्त्रिणश्च पराजयम् ।। ८

पौरुषेण प्रयत्नेन स्वभ्यासेन शनैःशनैः ।

द्वयं संपाद्य यत्नेन देशमाप्नोषि तं शुभम् ।। ९

त्वमभ्यासे फलीभूते तं देशमभिगच्छसि ।

यदि दैत्येन्द्र तद्भूयो मनागपि न शोचसि ।। १०

संशान्तसकलायासा नित्यप्रमुदिताशयाः ।

साधवस्तत्र तिष्ठन्ति प्रशान्ताशेषसंशयाः ।। ११

श्रृणु कः पुत्र देशोऽसौ सर्वं प्रकटयामि ते ।

देशनाम्ना मयोक्तस्ते मोक्षः सकलदुःखहा ।। १२

राजा तु तत्र भगवानात्मा सर्वपदातिगः ।

तेन मन्त्री कृतः प्राज्ञो मनो नाम महामते ।। १३

मनोनिष्ठतया विश्वमिदं परिणतिं गतम् ।

घटत्वेनेव मृत्पिण्डो धूमोऽम्बुदतयैव च ।। १४

तस्मिञ्जिते जितं सर्वं सर्वमासादितं भवेत् ।

दुर्जयं तद्विजानीयात्युक्त्यैव परिजीयते ।। १५

बलिरुवाच ।

या युक्तिर्भगवंस्तस्य चित्तस्याक्रमणे स्फुटम् ।

तां मे कथय तत्तावद्यथा जेष्यामि दारुणम् ।। १६

विरोचन उवाच ।

विषयान्प्रति भोः पुत्र सर्वानेव हि सर्वथा ।

अनास्था परमा ह्येषा सा युक्तिर्मनसो जये ।। १७

एषैव परमा युक्तिरनयैव महामदः ।

स्वमनोमत्तमातङ्गो द्रागित्येवावदम्यते ।। १८

एषा ह्यत्यन्तदुष्प्रापा सुप्रापा च महामते ।

अनभ्यस्तातिदुष्प्रापा स्वभ्यस्ता प्राप्यते सुखम् ।।१९

क्रमादभ्यस्यमानैषा विषयारतिरात्मज ।

सर्वतः स्फुटतामेति सेकसिक्ता लता यथा ।। २०

नासाद्यते ह्यनभ्यस्ता कांक्षतापि शठात्मना ।

पुत्र शालिरिवाव्युप्ता तस्मादेनां समाहर ।। २१

तावद्भ्रमन्ति दुःखेषु संसारावटवासिनः ।

विरतिं विषयेष्वेते यावन्नायान्ति देहिनः ।। २२

अभ्यासेन विना कश्चिन्नाप्नोति विषयारतिम् ।

अप्यत्यन्तबलो देही देशान्तरमिवागतिः ।। २३

ध्येयत्यागमतोऽजस्रं ध्यायता देहधारिणा ।

भोगेष्वरतिरभ्यासाद्वृद्धिं नेया लता यथा ।। २४

पुरुषार्थादृते पुत्र नेह संप्राप्यते शुभम् ।

क्रियाफलं परिप्राप्तुं हर्षामर्षविवर्जितम् ।। २५

दैवमित्युच्यते लोके न दैवं देहवत्क्वचित् ।

अवश्यं भवितव्याख्या स्वेहया नियतिश्च या ।। २६ ।

उच्यते दैवशब्देन सा नरैरेव नेतरैः ।

यद्यस्येह यदा यत्र संपन्नं समतां गतम् ।। २७

हर्षामर्षविनाशाय तद्दैवमिति कथ्यते ।

दैवं नियतिरूपं च पौरुषेणोपजीयते ।। २८

सम्यग्ज्ञानविलासेन मृगतृष्णाभ्रमो यथा ।

यथा संकल्प्यते यद्यत्पौरुषेण तथैव तत् ।। २९

फलवत्तागृहीतत्वे फलवत्तासुखप्रदम् ।

कर्ता नो मन एवेह यत्कल्पयति तत्तथा ।। ३०

नियतिं यादृशीमेतत्संकल्पयति सा तथा ।

नियतानियतान्कांश्चिदर्थाननियतानपि ।। ३१

करोति चित्तं तेनैतच्चित्तं नियतियोजकम् ।

नियत्यां नियतिं कुर्वन्कदाचित्स्वार्थनामिकाम् ।। ३२

स्फुरत्यस्मिञ्जगत्कोशे जीवो व्योम्नीव मारुतः ।

नियत्या विहितं कुर्वन्कदाचिन्नियतिं चरः ।। ३३

संज्ञार्थं रूढनियतिशब्दः स्फुरति सानुवत् ।

तस्माद्यावन्मनस्तावन्न दैवं नियतिर्न च ।। ३४

मनस्यस्तंगते साधो यद्भवत्यस्तु तत्तथा ।

जीवो हि पुरुषो जातः पौरुषेण स यद्यथा ।। ३९

संकल्पयति लोकेऽस्मिंस्तत्तथा तस्य नान्यथा ।

पुरुषार्थादृते पुत्र न किंचिदिह विद्यते ।। ३६

परं पौरुषमाश्रित्य भोगेष्वरतिमाहरेत् ।

न भोगेष्वरतिर्यावज्जायते भवनाशनी ।। ३७

न परा निर्वृतिस्तावत्प्राप्यते जयदायिनी ।

विषयेषु रतिर्यावत्स्थिता संमोहकारिणी ।। ३८

तावद्भवदशादोला विलोलान्दोलनस्थितिः ।

अभ्यासेन विना पुत्र न कदाचन दुःखदा ।। ३९

भोगभोगिभरप्रोता कदाशा विनिवर्तते ।। ४०

बलिरुवाच

भोगेष्वरतिरेवान्तः कथं सर्वासुरेश्वर ।

स्थितिमायाति जीवस्य दीर्घजीवितदायिनी ।। ४१

विरोचन उवाच ।

आत्मावलोकनलता फलिनी फलति स्फुटम् ।

जीवस्य भोगेष्वरतिं शरदीव महालता ।। ४२

आत्मावलोकनेनैषा विषयारतिरुत्तमा ।

हृदये स्थितिमायाति श्रीरिवाम्भोजकोटरे ।। ४३

तस्मात्प्रज्ञानिकाषेण विचारेणातिचारुणा ।

देवमालोकयेद्भोगाद्रतिं चावहरेत्समम् ।। ४४

चित्तस्य भोगैर्द्वौ भागौ शास्त्रेणैकं प्रपूरयेत् ।

गुरुशुश्रूषया चैकमव्युत्पन्नस्य सत्क्रमे ।। ४५

किंचिद्व्युत्पत्तियुक्तस्य भागं भोगैः प्रपूरयेत् ।

गुरुशुश्रूषया भागौ भागं शास्त्रार्थचिन्तया ।। ४६

व्युत्पत्तिमनुयातस्य पूरयेच्चेतसोऽन्वहम् ।

द्वौ भागौ शास्त्रवैराग्यैर्द्वौ ध्यानगुरुपूजया ।। ४७

साधुतामागतो जीवो योग्यो ज्ञानकथाक्रमे ।

निर्मलाकृतिरादत्ते पट उत्तमरञ्जनाम् ।। ४८

शनैः शनैर्लालनीयं युक्तिभिः पावनोक्तिभिः ।

शास्त्रार्थपरिणामेन पालयेच्चित्तबालकम् ।। ४९

परे परिणतं ज्ञाने शिथिलीभूतदुर्ग्रहम् ।

ज्योत्स्नाऽहीनस्फटिकवच्चेतः शीतं विराजते ।। ५०

प्रज्ञया परया ऋज्व्या भोगानामीश्वरस्य च ।

सममेवाथ देहस्य रूपमाश्ववलोकयेत् ।। ५१

प्रज्ञाविचारवशतः सममेव सदा सुत ।

आत्मावलोकनं तृष्णासंत्यागं च समाहरेत् ।। ५२

परदृष्टौ वितृष्णत्वं तृष्णाभावे च दृक्परा ।

एते मिथः स्थिते दृष्टी तेजोदीपदशे यथा ।। ५३

भोगपूगे गतास्वादे दृष्टे देवे परावरे ।

परे ब्रह्मणि विश्रान्तिरनन्तोदेति शाश्वती ।। ५४

विषयाकलितानन्दमनन्तोदेति निर्वृतिः ।

न कदाचन जीवानामात्मविश्रवणादृते ।। ५५

यज्ञदानतपस्तीर्थसेवाभिर्जायते सुखम् ।

न तपोभिर्न दानेन न तीर्थैरपि जायते ।। ५६

भोगेषु विरतिर्जन्तोः स्वभावालोकनादृते ।

कयाचिदपि नो युक्त्या बुद्धिरात्मावलोकने ।। ५७

स्वप्रयत्नादृते पुंसः श्रेयसे संप्रवर्तते ।

भोगसंत्यागसंप्राप्तपरमार्थादृते सुत ।। ५८

न ब्रह्मपदविश्रान्तिसुखमासाद्यते परम् ।

आब्रह्मस्तम्बपर्यन्ते जगत्यस्मिन्न कुत्रचित् ।। '५९

तद्वदाश्वस्यते भाते परमे कारणे यथा ।

पौरुषं यत्नमाश्रित्य दैवं कृत्वा सुदूरतः ।। ६०

भोगान्विगर्हयेत्प्राज्ञः श्रेयोद्वारदृढार्गलान् ।

प्रौढायां भोगगर्हायां विचार उपजायते ।। ६१

वृद्धायां प्रावृषि श्रीमांशरत्काल इवामलः ।

विचारो भोगगर्हातो विचाराद्भोगगर्हणम् ।। ६२

अन्योन्यमेते पूर्येते समुद्रजलदाविव ।

भोगगर्हाविचारश्च स्वात्मालोकश्च शाश्वतः ।। ६३

अन्योन्यं साधयन्त्यर्थं सुस्निग्धाः सुहृदो यथा ।

पूर्वं दैवमनादृत्य पौरुषेण प्रयत्नतः ।। ६४

दन्तैर्दन्तान्प्रसंपीड्य भोगेष्वरतिमाहरेत् ।

देशाचाराविरुद्धेन बान्धवैकमतेन च ।। ६५

पौरुषेण क्रमेणादौ धनानि समुपार्जयेत् ।

धनैरभ्याहरेद्भव्यान्सुजनान्गुणशालिनः ।। ६६

प्रवर्तते समासङ्गात्तेषां भोगविगर्हणा ।

ततो विचारस्तदनु ज्ञानं शास्त्रार्थसंग्रहः ।। ६७

ततः क्रमेण परमपदप्राप्तिः प्रजायते ।

यदा तूपरते काले विषयेभ्यो विरम्यसे ।। ६८

तदा विचारवशतः परमं पदमेष्यसि ।

सम्यक्प्राप्स्यसि विश्रान्तिमात्मन्यत्यन्तपावने ।। ६९

न पुनः कल्पनापङ्के दुःखाय निपतिष्यसि ।

स्थितापि नास्था ते शुद्ध नमस्तेऽस्तु सदाशिव ।। ७०

देशक्रमेण धनमल्पविगर्हणेन

तेनाङ्ग साधुजनमर्जय मानपूर्वम् ।

तत्संगमोत्थविषयाद्यवहेलनेन

सम्यग्विचारविभवेन तवात्मलाभः ।। ७१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे चित्तविचिकित्सायोगोपदेशो नाम

चतुर्विंशः सर्गः ।।२४।।